रिदं वचनमब्रवीत् । त्रिशङ्को ! गच्छ भूयस्त्वं नास्ति स्वर्गकृतालयः । गुरुशापहतो मूढ़ ! पत भूमिमवाक्शिराः । एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत् पुनः । विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम् । तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः । रोषमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् । ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः । सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः । नक्षत्रवंशमपरमसृजत् क्रोधमूर्च्छितः । दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः । सृष्ट्वा नक्षत्रवंशञ्च क्रोधेन कलुषीकृतः । अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः । दैवतान्यपि स क्रोधात् स्रष्टुं समुपचक्रमे । ततः परमसम्भ्रान्ताः सर्षिसङ्घाः सुरासुराः । विश्वामित्रं महात्मानमूचुः सानुनयं वचः । अयं राजा महाभाग ! गुरुशापपरिक्षतः । सशरीरो दिवं यातुं नार्हत्येव तपोधन ! । तेषां तद्वचनं श्रुत्वा देवानां मुनिपुङ्गवः । अब्रवीत् सुमहद्वाक्यं कौशिकः सर्वदेवताः । सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः । आरोहणं प्रतिज्ञातं नानृतं कर्त्तुमुत्सहे । स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः । नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्युत । यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः । मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ । एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम् । एवं भवतु भद्रन्ते तिष्ठन्त्वेतानि सर्वशः । गगने तान्यनेकानि वैश्वानरपथाद्बहिः । नक्षत्राणि मुनिश्रेष्ठ ! तेषु ज्योतिःषु जाज्वलन् । अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसन्निभः । अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम् । कृतार्थं कीर्त्तिमन्तञ्च स्वर्गलोकगतं यथा । विश्वामित्रस्तु धर्म्मात्मा सर्वदेवैरभिष्टुतः । ऋषिमध्ये महातेजा वाढमित्येव देवताः । ततो देवा महात्मान ऋषयश्च तपोधनाः । जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ! ।" ६० स०

त्रिशङ्कोरपत्यम् अण् । त्रैशङ्कव हरिश्चन्द्रे "तस्य (त्रिशङ्कोः) सत्यरथा नाम पत्नी कैकयवंशजा । कुमारं जनयामास हरिश्चन्द्रमकल्मषम् । स वै राजा हरिश्चन्द्रस्त्रैशङ्कव इति स्मृतः" हरिवं० १२अ० । (हेमच० त्रिशङ्कुशब्दे दृश्यम् ।

**त्रिशङ्कुज** पु० त्रिशङ्कोर्जायते जन–ड । हरिश्चन्द्रे नृपे

**त्रिशङ्कुयाजिन्** पु० त्रिशङ्कुं याजयति यज–णिनि । विश्वामित्रे हेमच० त्रिशङ्कुशब्दे दृश्यम् ।

**त्रिशत** न० त्रिगुणितं शतम् शा० त० । त्रिगुणिते शते ; "चतुर्विंशतिसंयुक्तं मण्डलं त्रिशतं स्मृतम्" कामन्दकी । "नरकं त्रिशतं प्राप्य स विष्ठामुपजीवति" भा० अनु० १०१ अ० । समा० द्वि० ङीप् । २शतत्रये स्त्री ।

**त्रिशरण** न० त्रीणि शरणान्यस्य । बुद्धदेवे त्रिका० ।

**त्रिशर्करा** स्त्री त्रिगुणिता शर्करा शा० त० । मिलितगुड़ोत्पन्नाहिमोत्था मधुरेति मधुरत्रिके राजनि० ।

**त्रिशला** स्त्री अर्हन्मातृभेदे हेमच० ।

**त्रिशाख** त्रि० तिस्रः शाखा अग्राणि यस्य । शिखाकाराग्रत्रययुते । "कृत्वा त्रिशाखां भ्रूकुटीं ललाटे" भा० कर्ण० ८५ अ० । [बिल्वे राजनि० ।

**त्रिशाखपत्र** पु० तिस्रः शाखा अस्य तादृशं पत्रं यस्य ।

**त्रिशाण** त्रि० त्रयः शाणाः परिमाणमस्य तैः क्रीतं वा अण् तस्य वा लुक् । १त्रिशाणपरिमिते २तत्क्रीते च । पक्षे न लुक् । त्रैशाण तत्रार्थे पक्षे यत् त्रिशाण्य तत्रार्थे एवं द्विशाणद्विशाण्य द्वैशाण द्विशाणक्रीते तत्परिमिते त्रि० ।

**त्रिशालक** न० तिस्रः शाला यत्र वा कप् । हिरण्यनाभाख्ये वास्तुभेदे तत्फलादिकं वृ० स० ५३ उक्तं यथा "उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम् । प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु । याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरमेतत् । पक्षघ्नमपरयावर्जितम् सुतध्वंसवैरकरम्" ।

**त्रिशिख** न० तिस्रः शिखा अस्य । १त्रिशूले अस्त्रभेदे २किरीटे च हेमच० । ३शिखात्रययुक्ते त्रि० । "त्रिशिखां भ्रूकुटिञ्चास्य ददृशुर्दानवा रणे" हरिवं० २२५ अ० । "त्रिशिखां भ्रूकुटीं कृत्वा सन्दश्य दशनच्छदम्" भा० आ० १६३ अ० । ४रावणपुत्रे राक्षसभेदे पु०

**त्रिशिखिदला** स्त्री तिस्रः शिखाः सन्त्यत्र इनि तादृशं दलमस्य । मालाकन्दे राजनि० ।

**त्रिशिरस्** पु० त्रीणि शिरांस्यस्य । १कुवेरे हेमच० । २रावणपुत्रभेदे ३खरसेनापतिभेदे च । त्रिशिरस्के ४ज्वरे च । "त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयम्" भाग० १० अ० वाणयुद्धे । अस्य अदन्तत्वमपि "सर्वे सान्ता अदन्ताः स्युः" इत्युक्तेः "खरत्रिशिरदूषणप्रमुखबन्धून्" भाग० ९ । १० । १० "ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" हरिवं० १८१ अ० । त्रयो वेदाः शिरांसीव यस्य । ५जैवे रथे पु० । "सब्रह्मरस्तस्य रथस्त्रिचक्रस्त्रिवृच्छिरास्त्रिशिराश्च त्रिनाभिः" भा० आनु० १६८ अ० । नील-